International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 151-153
© 2017 IJSR
www.anantaajournal.com
Received: 13-11-2016
Accepted: 18-12-2016

डॉ. संजय कुमार झा
शिक्षक, रा0उ0 विद्यालय, सिंघाड़ा, महुआ, वैशाली, बिहार, भारत

Corresponding Author:
डॉ. संजय कुमार झा
शिक्षक, रा0उ0 विद्यालय, सिंघाड़ा, महुआ, वैशाली, बिहार, भारत

# वेदवर्णितं सूर्यपर्यायेषु वैज्ञानिकत्वम्

डॉ॰ संजय कुमार झा

सारांश:
सूर्य: एतादृश: देवो वर्तते येन प्रत्येक प्राणीसंवर्ग: किंवा भौतिक जगत: लव: लवोऽपि चिर परिचित: । सूर्यस्य देवत्वं अस्य कर्तृत्वं बाहुल्येन भूयांसि पर्यायानि प्रसिद्धानि। अस्य विविधपर्यायेषु साम्यं भवते अपि कर्तृत्वाधार आधारे पार्थक्यं परिलक्षन्ते। वेदेषु सूर्यस्य विविधेषु पर्यायेषु वैज्ञानिक: आधार: विद्यते। वैज्ञानिक परिप्रेक्ष्ये अस्य विवेचनम् आवश्यकम्।

## प्रस्तावना

वेदेषु सूर्य: अनेकेषु पर्यायेषु विभक्त: अस्ति। सूर्यस्य एतेषां पर्यायानां पृष्ठभूमौ नूनमेव कच्चित् वैज्ञानिकत्वं गुहितं यत् अस्य तदनुरूपेण व्यापारेन मेलयति। सूर्यसहस्रानामेषु यत्र सूर्यस्य सहस्र (1000) नामानि परिगणितानि, आदित्यहृदयस्तोत्र स्थित सूर्यस्य अष्टोत्तरशतनामानि (108) उल्लिखितानि अमरसिंह विरचितम् अमरकोशे तु अस्य त्रित्रिंशत (33) पर्याया: उल्लिखिता: तत्रैव वेदेषु अस्य क्वचिद् षड् (6) क्वचिद् सप्त (7), दश (10) एकादश (11) प्रभृतय पर्याया: समुल्लिखिता: । सूर्यस्य विविधपर्यायानां विश्लेषयन्त: एतेषु अन्तर्निहितं वैज्ञानिकत्वं वयम् अधुना पश्याम।

सर्वप्रथम: वेदेषु प्राचीन: ऋग्वेदात् वयं प्रारभामहै। ऋग्वेदे सूर्यस्य क्वचिद् षड् क्वचित् सप्त तु कुत्रचित् द्वादश पर्याया: उपलभन्ते–

''श्रृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरूणो दक्षे अंश:।'' [1]

मन्त्रेऽस्मिन् सूर्यस्य षडपर्यायानि उल्लिखितानि – मित्र:, अर्यमा, भग:, वरूण:, दक्ष:, अंशश्च।

1. मित्र: निरूक्तकारयास्क महोदयेन मित्रशब्दस्य निर्वचनं निम्नरूपेण कृतम् –

''मित्र: प्रमीतेस्त्रायते। सिमिन्वानो द्रवतीति वा मदयतेर्वा।'' [2]

मूलशब्द: 'प्रमीति:' इत्यस्यार्थ भवति–मृत्यु: विनाश: वा। समिन्वान: तात्पर्य: समिधा वा अग्नि: इत्यनेन भवति। अभिप्रायोऽभवत् य: मृत्यो: रक्षेत्, कोपानलं शाम्येत् किम्वा चित्त आह्लादयेत् स मित्र:। दयानन्द सरस्वत्या: इदं वचनं तदर्थ अभिप्रेतोऽस्ति –

''मेद्यति स्निह्यति स्निह्येत् वा स मित्र:'' [3]

अर्थात् सर्वेभ्य: प्रीत्य: परमेश्वर: मित्र:।

2. अर्यमा– अर्यमापदस्योत्पत्ति: गत्यर्थक 'ऋ गतौ प्रापणे' धातो: कनिन्प्रत्यय योजनेन निपातनेन सिद्ध: – अर्य+मा+कनिन् व्याकरणाचार्य: अस्य व्याख्या निम्नप्रकारेण कृत: –

''ऋच्छति सततं गच्छतीति'' [4]

अर्थात् अनिशम वा अहर्निशं गमनत्वरूप व्यापारं अस्ति यस्य स। अयं पितरदेवेषु सुर्यनाम्ना प्रसिद्ध: अस्ति–

''अर्यमा तु पुमान सूर्ये पितृदेवान्तरेऽपि चा'' [5]

पुन: ''अर्यमा कथित: सूर्ये पितृदेवान्तरे तथा।'' [6]

3. भग – सायणाचार्य: सूर्यस्य पर्याय: भगस्य व्याख्या निम्नवत् कृत:

''भगो भजनीयो देव:। भगो भजते:।'' [7]

अर्थात् भजनीय: स्तुत्य: वा देव: भगो कथ्येत: भगपद: अनेकार्थक: वर्तते येषु एकेऽर्थ: – ऐश्वर्यमपि विद्यते। प्रशस्य: धनप्रदाता देव: भग:। भग ऐश्वर्यम् तत् यत् सेवनीयम् – 'भज् सेवायाम्'। मम मतानुसारेण 'भग पदे' भागभाव: सामाविष्ट: यतोहि प्राणिन: भाग्ये यत् भागं सत् असत् वा समायाति तत् नूनं सेवनमेव। ऋग्वेदस्यैकऋचा तत्संदर्भे प्रमाणभूता – सुवाति सविता भग:

''अर्थात् साक्षात् सविता देवता भगैव।'' [8]

4. वरूण – वरूणपदस्य निष्पत्ति: 'वृञ् वरणे' धातो: 'कृवृदारिभ्य: उनन्' इत्यनेन उनन् प्रत्ययेन संयोजनेन जात:।

वरिदयूथै: किम्वा रश्मिमण्डलै: य: सकल जगत् आवृणोति आच्छादयति वा स वरूण:। वरूणपदमभिलक्ष्य निरुक्तकारस्य निर्वचनं तदर्थ अभिप्रेतोऽस्ति

''आवृणोति ह्ययं मेघजालेन वियत्।'' [9]

वरुण: अपाम् देवता कल्प्यते (ळवक वर्ि जमत) अमरकोशे अपां पति: याद: पति: रूपे बहुव: अस्य पर्याय: मिलन्ति। कौषीतकि ब्राह्मणस्य उक्तिरियं सूर्यवरुणयो: मध्ये साम्यं स्थापयितुं प्रमाणभूता –

''स वा एषो (सूर्यो)ऽप: प्रविश्य वरुणो भवति।'' [10]

तात्पर्यो वर्तते सूर्यस्य यदा अप्सु (जले) प्रविष्टि भवति तदा स वरूण पर्यायं सार्थकत्वं विदधाति। वयं सुविद्म: एष सूर्य: स्वस्य रश्मिजालै: मेघमण्डलं निर्माण कृत्वा स्वच्छंदरूपेण वृष्टिपातं करोति। वेदस्य निम्न ऋचा तदर्थ प्रमाणभूता –

''आदित्याज्जायते वृष्टि: वृष्टेरन्नं तत: प्रजा'' [11]

5. दक्ष: – दक्षपदे द्वौ वर्णौ सारगर्भितौ –

(प) द च (पप) क्ष च (प) द = ददाति दापयति वा (पप) क्ष = क्षरति। येन अहर्निशं किम्वा अनिशम् ऊर्जाया: प्रकाशश्च क्षरणं भूते सति सृष्टिचक्रं निबधिं प्रवर्तमानम्। सकल सृष्टिं सम्यक्रूपेण परिपालनेन कार्याणां कौशलत्वेन दक्षत्वेन वा अयं (सूर्य:) एष: पर्याय: अङ्गीकरोति। लौकिक संस्कृत साहित्ये अयमेव दक्ष प्रजापति रूपे विख्यात:।

6. अंश: – अंश: अंशापयति: य: सर्वेभ्य: समानरूपेण स्वस्य भागं ददाति स अंश:। सूर्य: ऊर्जा आदय: वितरणेषु सर्वेभ्य: समतुल्यं कर्तुं उक्त पर्यायं समलङ्करोति। परवर्ती साहित्येषु अयमेव अंशु रूपे विख्यात: ।

7. पूषा – पूषा पर्यायम्. अभिख्यायितुं प्राक् अस्य पोषकत्वमेव मूल कारणम् 'पूषा पोषणे' धातो: पूषा शब्दस्य उत्पत्तिर्जात:। वस्तुत: सर्वेषां प्राणीनां सम्यक् रूपेण परिपालनेन अयं पूषा पर्यायम् सुशोभितम्

''पुष्णातीति पूषा'' [12]

''पवुष्यतेऽनेनति पूषा'' [13]

''पूषाऽपोषयत्'' [14]

''असौ वै पूषा योऽसौतपति'' [15]

प्रभृतय: मन्त्रांश: उक्त तथ्यं समीचीनं करोति।

8. विष्णु: – वेदेषु सूर्यस्य पर्यायेषु एक पर्याय: विष्णुरपि विद्यते। व्याप्तिं पदं अभिव्यक्तुं विश् (विशति), विष् (विष्णाति) किम्वा वेविष् (वेवेष्टि) धातो: विष्णु: शब्द: व्युत्पन्न:। यास्काचार्यस्य मतानुसारेण विष्णुपर्यायस्य अन्वर्थकत्वं आधारं अस्मिन् मर्त्यभुवने सूर्यस्य रश्मिपुञ्जस्य व्यापकत्वं वर्तते।

''अथ यद्विषितो भवति तद्विष्णु र्भवति। विष्णुर्विशतेर्वा व्यश्नातेर्वा।'' [16]

अयं मर्त्यलोक: स्वस्य रश्मिजालेषु आविष्टुं किंवा आबद्धयितुं अस्य विष्णु पर्याय: सार्थक: जात:।

9. सविता – यास्काचार्य: सविता पदं इत्थं परिभाषितम्

''सविता सर्वस्य प्रसविता'' [17]

अर्थात् सविता सर्वेषां प्रेरका अस्ति।

शंकराचार्यस्य मतानुसोरण सविता सर्वस्य जगत: उत्पत्तिकत्ता अमन्यत्

''सर्वस्य जगत: प्रसविता सविता'' [18]

सूर्ये उत्पत्तेर्बीज: विद्यमान:। जगतोऽयं प्रासवितु प्रसवितुं वा अस्य सविता नाम सार्थकोऽभूत्।

''सवनात सविता'' [19]

समुत्पन्नार: पालनकर्त्रा सह मायाजन्य:

सम्बन्ध: भवति। अत: सूर्य: न केवलं अंय भौतिक जीवजगत् प्रभवति प्रत्युत् प्रभवत्य अस्य पालनमपि करोति। गीताया: इयं सावभौम उक्ति: यत् य: जायते स म्रियते एव च –

''जातस्य हि ध्रुवो मृत्यु:'' [20]

इत्यनेन उत्पत्ति पालन नाश एतेषु त्रिविध् वय: चक्रेषु स्रष्टा देवस्य स्पष्ट सूत्रधारित्वं लक्षितम्। सत्यमेव एष: भूतभावन परमेश्वर: एव स्वस्मिन् दिव्यरूपेषु त्रिविध् वय: चक्रेषु संचरति उत्पत्ति, पालन नाशश्च अर्थात् सृष्टे: आरभ्य प्रलयपर्यन्तचक्रेषु अयमेव एको देव: स्वस्य सूक्ष्मतमरूपेषु सर्वत: परिलक्षन्ते। जीवनस्य सूंत्र अस्य रश्मरूपी करेषु स्थितम्। विश्वमंचे आसीन: किम्वा अवतरित: एष: एव अस्मांभि: जीवनयात्र सम्पादयते अखिल दृश्यमान जगत् अस्य प्रतिबिम्बनम्। स्वकीयदीव्यज्योतया तत् परिष्कृत्य विविध आयामं सम्पद्यमानेन अस्मिन्नैव त्वष्टा, धाता, विश्वकर्मा आदि पर्यया जागृता सन्ति।

निष्कर्षत:

अस्तु सूर्यस्य भिन्न भिन्न पर्याय: कार्यभेदै: पृथक् भूते सति सर्वे अन्तर्सम्बन्धिता:। सैव अद्वितीय: सूर्य: स्वस्य व्यापार वैविध्यै: विभिन्नै: पर्यायरूपै: अहूत: । एकैव सूर्य: अखिलेषु सत्वेषु समाहित्वा नानारूपेषु प्रतिभासमान: – ''एक: सूर्य: विश्वमनुप्रभूत:।'' [21]

वस्तुत: एकैव सौर शक्ते: उन्मेष: अस्य सर्वेषु पर्यायेषु समानरूपेण अनुसन्धेय: ''एकं सद्विप्रा बहुधा वदन्ति'' [22] अनया वेदोक्तया उपर्युक्त मतैव अभिप्रेत:। सूर्यस्य सर्वेषु रूपेषु अस्य वर्ण वैलक्षण्यस्य विपुलं वैभंव दृश्यते। वर्ण विन्यासं बिना संसारस्य सप्तवर्णीय समा असंभवम्।

सन्दर्भ सूची :-


1. ऋग्वेद - 1/127/1
2. निरुक्त - दैवतकाण्डम् - 10/2/9
3. सत्यार्थ प्रकाश, स्वामी दयानन्दसरस्वती - प्रथम समुल्लासः, पृष्ठ- 14
4. उणादिरत्न कौमुदी - रचयिता - पं0 अर्जुन झा पृष्ठ सं0 - 238
5. औणादिक पदार्णव, रचयिता - पेरूसूरि - 1/151/8 13
6. मेदिनी कोश ग्रन्थ - पृष्ठ - 95, श्लोक - 64
7. ऋग्वेद - 1/114
8. ऋग्वेद - 7/66/4
9. निरुक्त - 3/7/6
10. कौषीतकि ब्राह्मण - 18/19
11. ब्रह्मपुराण - 31/4, मनुस्मृति - 3/76
12. काठक संहिता - 19/6
13. तैत्तिरीय ब्राह्मण - 2/7/2/1
14. तैत्तिरीय ब्राह्मण - 1/6/2/2
15. कौषीतकि ब्राह्मण - 5/2
16. निरुक्त दैवताकण्डम् उपरि दुर्गाचार्यस्य भाष्यः।
17. निरूक्त दैवतकाण्डम् - 10/3/31
18. विष्णुसहस्रनाम अपरि शाङ्कंरभाष्यम् पृ0 सं0- 107
19. मैत्रायण्युपनिषद् - 5/7
20. गीता - 2/27
21. ऋग्वेद - 8/58/2
22. तदैव - 1/164/46